# Session 2020-21

# प्रश्नपत्रम् रूप रेखा

## कक्षा - दशमी (

## विषय - संस्कृतम्

**समय : होरात्रयम्** **पूर्णांक : 85**

**खण्ड - क**

**अपठित - अवबोधनम्**

1. अधोलिखितम् अनुच्छेदम् अधिकृत्य निर्देशित प्रश्नानामुतराणि दीयन्ताम्।
1×5=5

एकास्मिन् ग्रामे कश्चित् निर्धन: युवक: आसीत्। तस्य नाम धनपाल: आसीत्। स: प्रतिदिनं भिक्षायै ग्रामं ग्रामं प्रति भ्रमति स्म। भिक्षायां प्राप्तै: सक्तुभि: तस्य घट: पूर्ण: अभवत्। स: घटं नागदन्ते अवलम्बव्य तस्य नीचै: खट्वायां शयनं करोति स्म। शयनकाले च निरन्तरम् एकदृष्ट्या घटं पश्यति स्म।

(1) एकपदेन उत्तरत–

(क) निर्धन–युवकस्य नाम किम्?

(ख) धनपाल: किमर्थम् ग्रामं ग्रामं प्रतिभ्रमति स्म?

(2) पूर्णवाक्येन उत्तरत–

(क) धनपाल: घटं कुत्र अवलम्ब्य शयनं करोति स्म?

(3) निर्देशानुसारम् उत्तरत–

(क) 'निर्धन: युवक:' इत्यनयो: विशेष्यपदं किम्?

(ख) 'तस्य नाम धनपाल: आसीत्' इत्यत्र क्रियापदं किम्?

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारित प्रश्नानाम् उत्तराणि लिखत।
1+1+1+1+1+1+1+1=8

अस्माकं विद्यालय: राजकीय: विद्यालय: अस्ति। अत्र पठनस्य तु श्रेष्ठा

व्यवस्था अस्ति एव युगपदेव क्रीडानामपि सुलभा व्यवस्था अस्ति। अत: एव अस्माकं विद्यालयस्य सर्वासां कक्षाणां परिणाम: शतप्रतिशतं भवति। क्रीडानां प्रतियोगितासु अपि अस्माकं विद्यालयस्य छात्रा: बह्वन् पुरस्कारान् अलभन्त। अस्माकं विद्यालय वार्षिकोत्सव: परह्य: सम्पन्नो जात:। तत्र अस्माकं राजस्य राज्यपाल: मुख्यातिथि: आसीत्। यदैव मुख्यातिथि: द्वारं सम्प्राप्त:, छात्रा: वाद्ययन्त्राणां ध्वनिना तस्य स्वागतम् आचरन्। तत: स: समञ्चस्य सम्मुखे आसनं भूषितवान्।

(1) एकपदेन उत्तरत–

(क) अस्माकं विद्यालय: कीदृश: अस्ति? 1

(ख) मञ्चस्य सम्मुखे आसनं क: भूषितवान्? 1

(2) पूर्णवाक्येन उत्तरत–

(क) वार्षिकोत्सवस्य मुख्यातिथि: क: आसीत्? 1

(3) निर्देशानुसारम् उत्तरत–

(क) उपरोक्तं गद्यांशं पठित्वा तृतीयांशतुल्यं सारं लिख्यन्ताम्। 3

(ख) प्रदत्तगद्यांश्य उचितं शीर्षकं लिखत। 1

**खण्ड-ख**

**( रचनात्मकं कार्यम् )**

3. सौम्य: दिल्लीनगरे वसति। तस्य मित्रं सुमति: असमप्रदेशे वसति। सौम्येन गणतन्त्रदिवसस्य शोभायात्रायां भाग: गृहीत:। स: स्वानुभवान् स्वमित्रं सुमतिं प्रति पत्रे लिखति। मञ्जूषात: पदानि विचित्य पत्रं पूरयन्तु।

| |
|---|
| पितरौ, गृहीत:, नमस्ते, मम, सुहृद्, राजपथम्, वाद्यवृन्दम्, लोकनृत्यानि, गणतन्त्रदिवससमारोहस्य, प्रमुखसञ्चालक:। |

½×10=5

ए–14, वसन्तविहार:

नवदिल्लीत:

तिथि: 05–10–2020

प्रियसखि सुमते,

1. ................ ।

अत्र कुशलं तत्रास्तु। अहं (2) .............. सज्जायां व्यस्त: आसम्। अत: विलम्बेन तव पत्रस्य उत्तरं ददामि। अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य शोभायायात्रायां भाग: (3) ..........।

अस्माकं विद्यालयस्य (4) ............ राजपथे स्वकलाया: प्रदर्शनम् अकरोत्। अहं गरवानृत्यस्य (5) .......... आसम्। छात्राणां राष्ट्रगानस्य ओजस्वी ध्वनि: (6) ......... गुञ्जितम् अकरोत्। स्वराष्ट्रस्य सैन्यबलानां पराक्रमप्रदर्शनानि, विचित्र-वर्णानि, परिदृश्यानि (7) ......... च दृष्ट्वा अहं गौरवान्वित: अस्मि। (8) ....... बाल्यावस्थाया: स्वप्न: तत्र पूर्ण: जात:। (8) ............ वन्दनीयौ।

भवत्या: (10) ........ ।

सौम्य:।

| |
|---|
| आवरणम् |
| सविधे |
| सुश्री सुमति: |
| 98, भवतारमार्ग: |
| असमप्रदेश: 533277 |

4. मञ्जूषामधिकृत्य अधोलिखित सम्वादं पूर्यन्ताम् -

| |
|---|
| त्वम्, अधुना, किम्, करोषि, सुरभि:, नाम, अपि, न, अहम्, गायामि। |

½×10=5

सुरभि: - तव नाम (1) ....... ?

गौरव: - मम (2) ........... गौरव:। तव नाम किम्?

सुरभि: - मम नाम (3) ......... ।

सुरभि: - गौरव ! त्वम् किम् (4) ........ ?

गौरवः – सुरभे! (5) .......... पठामि। त्वम् किम् करोषि?

सुरभिः – अहम् (6) ......... पठामि।

गौरवः – सुरभे! किं (7) .......... गायसि?

सुरभिः – आम्! अहं (8) ........... नृत्यामि च।

गौरवः – आम्! अहम् अपि गायामि परम् अहम् (9) ........... नृत्यामि।

सुरभिः – (10) .............अहम् गच्छामि।

5. अधोलिखितेषु विषयेषु एकं विषयमधिकृत्य संस्कृत भाषायाम् पञ्चवाक्यानि लिखत। 5×1=5

मम विद्यालयः पर्यावरणम् मम प्रियः नेता

**खण्ड – ग**

**( अनुप्रयुक्त व्याकरणम् )**

6. निम्नलिखितेषु त्रयाणां पदानां सन्धिः / सन्धिच्छेदं वा क्रियताम्।1×3=3

मनोरथः, वागीशः, परोपकारः,

गिरि+ईशः, कः+चित्, सत्+चित्।

7. अधोलिखितेषु वाक्येषु चतुर्णां पदानां समासमधिकृत्य समस्तपदं विग्रहपदं वा विधीयन्ताम्। ½×4=2

(क) यस्य अस्ति ............. सः मूर्खः। (अविद्या)

(ख) ......... शीलता अस्ति। (पञ्चवटी)

(ग) रामः ............. धावति। (अनुमृगम्)

(घ) ......... जलं पिब। (वस्त्रेण पूतम्)

(ङ) .......... वनं अगच्छताम्। (रामः च लक्ष्मणः च)

(च) .......... लंकायाम् अवसत्। (दश आननानि यस्य सः)

8. अधोलिखितेषु वाक्येषु पञ्चवाक्यानां प्रकृति–प्रत्ययं पृथक्–पृथक् सम्मेल्य वा लिखत। 1×5=5

(क) सः समाचारपत्रं ........... हसति। (पठ् + क्त्वा)

(ख) ......... रमा दीपं प्रज्वालयति। (श्रीमत् + ङीप्)

(ग) त्वया असत्यं न ........... । (वद् + तव्यत्)

(घ) अत्र.........उत्सवः अस्ति। (धर्म + ठक्)

(ङ) ........... नरः दानेन शोभते। (धनवान्)

(च) .......... बालकः लिखति। (पठन्)

(छ) ........ जनाः सफलतां लभन्ते। (परिश्रमिणः)

(ज) .......... सदैव निन्दनीया। (क्रूरता)

9. मञ्जूषातः अव्ययपदानि विचित्य रिक्तस्थानानि पूरयत – ½×10=5

| पुरा, अधुना, कदा, खलु, तथा, यदा-कदा, मा, बहिः, विना, ह्यः। |
|---|

(1) ........... फलेषु कदाचन।

(2) विद्यां ........... जीवनं व्यर्थम्।

(3) ........... शनिवासरः आसीत्।

(4) यथा राजा ......... प्रजा।

(5) त्वम् ........... आगमिष्यसि।

(6) .......... वयं गृहं गच्छामः।

(7) सर्वं ........... इदं ब्रह्म।

(8) कक्षात् ............ मा गच्छ।

(9) आसीत् ........... शूद्रको नाम राजा।

(10) अहम् ............ पुस्तकालयं गच्छामि।

10. अधोलिखितेषु वाक्येषु त्रीणि वाक्यानि अधिकृत्य वाच्य-परिवर्तन कुरूत।

1×3=3

(क) त्वम् लिखसि।

(ख) सारिका गीतां पठति।

(ग) सः ग्रामं पठति।

(घ) शिशुना दुग्धं पीयते।

(ङ) रामः गीतं गायति।

11. घटिका चित्रानुसारं समयं संस्कृत भाषायां लिखत। 1×4=4

(चत्वारि एव)



12. अधोलिखितेषु पदेषु त्रयाणां पदानां पदपरिचयः दीयन्ताम्।

मोहनाय, पितुः, अहम्, पास्यामि, द्रक्ष्यथ, अलिखत्।

1×3=3

13. निम्नवाक्येषु लिङ्गाधारित संख्यावाचकपदानि प्रयुज्यताम् (कानिचित् चत्वारि वाक्यानि) ½1×4=2

(क) वरम् ............. गुणी पुत्रः। (एका / एकः / एकम्)

(ख) अत्र ............ मित्रे वसतः। (द्वे / द्वि / द्वौ)

(ग) अत्र ............ पुस्तकानि सन्ति। (त्रयः / तिस्रः / त्रीणि)

(घ) तस्मिन् उद्याने ............ बालिकाः सन्ति।

(चतस्रः / चत्वारि / चत्वारः)

(ङ) पाण्डवाः ........... आसन्। (पञ्चाः / पञ्चानि / पञ्च)

(च) भाषाणाम् अपि ............ विभागाः सन्ति। (त्रीणि / तिस्रः / त्रयः)

14. निम्नवाक्येषु चत्वारि वाक्यानि संशोधयत्। ½×4=2

(क) सः लिखसि। (ख) राधा मम अनुजः अस्ति।

(ग) अहं चित्रं पश्यति। (घ) कृष्णं नमः

(ङ) तौ वनं अगच्छन्। (च) मम फलं रोचते।

## खण्ड - घ

## ( पठित् - अवबोधनम् )

15. (अ) अधोलिखित गद्यांश पठित्वा यथानिर्देशं प्रश्नान् उत्तरत-

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद - ''कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।'' 1×5=5

(1) एकपदेन उत्तरत-

(क) देउलाख्यः कः अस्ति?

(ख) राजपुत्रस्य नाम किम्?

(2) पूर्णवाक्येन उत्तरत-

(क) बुद्धिमती कीदृशे मार्गे व्याघ्रं ददर्श?

(3) निर्देशानुसारम् उत्तरत-

(क) 'मार्गे गहनकानने' इत्यत्र विशेषणपदं किम्?

(ख) 'बुद्धिमान्' इत्यस्य स्त्रीलिङ्गे किम् पदमस्ति?

(आ) अधोलिखितं पद्यांशं पठित्वा यथानिर्देशं प्रश्नान् उत्तरत- 1×5=5

व्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्कतेऽपक्वं विमूढधीः।।

(1) एक पदेन उत्तरत-

(क) कीदृशीं वाचं न त्यजेत्?

(ख) कीदृशीं वाचं न वदेत्?

(2) पूर्णवाक्येन उत्तरत-

(क) विमूढधी: किम् भुङ्क्ते?

(3) निर्देशानुसारम् उत्तरत-

(क) 'त्यक्त्वा' इत्यत्र प्रकृति-प्रत्ययं पृथक् कृत्वा लिखत।

(ख) 'पक्वम्' इत्यस्य पदस्य विलोमपदं किम्?

(इ) अधोलिखितं नाट्यांश पठित्वा यथानिर्देशं प्रश्नान् उत्तरत- 1×5=5

राम: - समरूप: शरीरसन्निवेश:। वयसस्तु न किञ्चिदन्तरम्।

लव: - आवां यमलौ।

राम: - सम्प्रति युज्यते। किं नामधेयम्?

लव: - आर्यस्य वन्दनायां लव: इत्यात्मानं श्रावयामि

(कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम्..........

कुश: - अहमपि कुश इत्यात्मानं श्रावयामि।

राम: - अहो! उदात्तरम्य: समुदाचार:।

किं नामधेयो भवतोर्गुरु: ?

लव: - ननु भगवान् वाल्मीकि:।

राम: - केन सम्बन्धेन ?

लव: - उपनयनोपदेशेन। 1×5=5

(1) एकपदेन उत्तरत-

(क) यमलौ कौ स्त:?

(ख) अत्र गुरु: कोऽस्ति?

(2) पूर्णवाक्येन उत्तरत-

(क) वाल्मीकि: कुशलवयो: गुरु: केन सम्बन्धेन अस्ति?

(3) निर्देशानुसारम् उत्तरत–

(क) 'निर्दिश्य' इत्यत्र प्रकृति–प्रत्ययं पृथक् कृत्वा लिखत।

(ख) 'सम्बन्धेन' इत्यस्य पदपरिचयं कुरुत–

16. (अ) अधोलिखित – गद्यांशयोः कस्यचिद् एकस्य गद्यांशस्य हिन्दी–भाषायाम् अनुवादं लिखत। 1×3=3

(क) ''बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनु भवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव'' इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। स च तामेवमसान्त्वयत्–''गच्छ वत्से! सर्वं भद्रं जायेत।''

(ख) वनस्य दृश्यं समीपे एवैका नदी वहति। एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षम् आरूढः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति।

(ग) अधोलिखित – पद्यांशयोः कस्यचिद् एकस्य पद्यांशस्य हिन्दी–भाषायाम् अनुवादं लिखत। 3×1=3

(क) पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।

(ख) विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः।।

17. अधोलिखितवाक्येषु चतुर्णां वाक्यानां रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत। ½×4=2

(क) शकटीयानम् <u>कज्जलमलिनं</u> धूमं मुञ्चति।

(ख) उद्याने <u>पक्षिणां</u> कलरवं चेतः प्रसादयति।

(ग) पाषाणीसभ्यतायां <u>लतातरुगुल्माः</u> प्रस्तरतले पिष्टाः सन्ति।

(घ) <u>महानगरेषु</u> वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति।

(ङ) <u>प्रकृत्याः</u> सन्निधौ वास्तविकं सुखं विद्यते।

(च) त्वं <u>मानुषात्</u> विभेषि।

18. (अ) कानिचित् चत्वारि समानार्थकपदानि योजयत – ½×4=2

| | |
|---|---|
| चक्षुर्भ्याम् | वृषभः |
| जवेन | वासवः |
| इन्द्रः | नेत्राभ्याम् |
| पुत्राः | अचिरम् |
| शीघ्रम् | द्रुतगत्या |
| बलीवर्दः | सुताः |

(आ) कानिचित् चत्वारि विलोमपदानि योजयत – ½×4=2

| | |
|---|---|
| पक्वः | उद्योगः |
| विमूढधीः | अकातरः |
| कातरः | कठोरा |
| कृतज्ञता | अपक्वः |
| आलस्यम् | मन्दधीः |
| परुषा | कृतघ्नता |

19. कानिचित् चत्वारि विशेषणविशेष्यपदानि योजयत– ½×4=2

| | |
|---|---|
| श्लाघ्या | कुशलवयोः |
| उदात्तरम्यः | स्पर्शः |
| अतिदीर्घः | कथा |
| समरूपः | समुदाचारः |
| हृदयग्राही | प्रवासः |
| कुमारयोः | कुटुम्बवृत्तान्तः |

| क्रम. स. | पाठ संख्या | हटाये गये अध्याय / पाठ का नाम | पृष्ठ सं. |
|---|---|---|---|
| | | कक्षा-9वीं<br>पुस्तक का नाम : शेमुशी भाग-1 | |
| 1. | अध्याय 7 | प्रत्यभिज्ञान | 45 से 55 तक |
| 2. | अध्याय 10 | जटायो: शैर्यम्। | 71 से 77 तक |
| 3. | अध्याय 12 | वाङ्मनः प्राणस्वरूपम्।<br><br>कक्षा - दसवीं<br>पुस्तक का नामः शेमुशी भाग-2 | 85 से 90 तक |
| 1. | अध्याय 10 | भूकम्पविभीषिका। | 82 से 89 तक |
| 2. | अध्याय 11 | प्राणेभ्योऽपि प्रिय: सुहृद। | 90 से 98 तक |
| 3. | अध्याय 12 | अन्योत्त्क्य:। | 99 से 106 तक |

विशेष-कक्षा नवीं के प्रश्न-पत्र का अंक विभाजन पिछले सत्र की भान्ति ही है। प्रश्नों के अंक विभाजन में कोई परिवर्तन नहीं किया गया है।